# Celebration of Republic Day in SSSU Campus

# (26-01-2017)

Shree Somnath Sanskrit University celebrated the 68th Republic Day on26th January 2017. Flag hoisting ceremony performed by Hon'ble Vice-Chancellor. In this occasion, students participated in activities like song, plays, group dance etc.



## विश्वविद्यालये समाचरितः गणतन्त्रदिवसः

गणतन्त्रदिवसे भाषमाणाः कुलपतयः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन भारतराष्ट्रस्य ६८तमः गणतन्त्रदिवसः जनवरीमासस्य २६ तमे दिनाङ्के विश्वविद्यालयप्राङ्गणे समाचरितः । कार्यक्रमेऽस्मिन् विश्वविद्यालयस्य कुलपतिः प्रो. अर्कनाथचौधरी, कार्यकारिकुलसचिवः डो. दशरथजादवः, अनुस्नातकभवनाध्यक्षः प्रो. विनोदकुमारझा, वेदविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, प्राचार्यः डो. नरेन्द्रकुमारपण्ड्या तथा विश्वविद्यालयस्य अन्ये प्राध्यापकाः, अधिकारिणः, कर्मचारिणः, छात्राश्च उपस्थिताः आसन् । कार्यक्रमस्यारम्भे कुलपतिना ध्वजवन्दनं

भारतध्वजाय सम्मानं यच्छन्तः विश्वविद्यालयकुटुम्बीयाः

विहितम् । तदनु सर्वैः जनैः राष्ट्रगानं गीतम् । एतस्मिन्नवसरे कुलपतिना स्वसन्देशे भणितं यत् अस्माकं देशस्य स्वातन्त्र्यन्तु हुतात्मनः बलिदानेन अवाप्तम्। परमस्य राष्ट्रस्य स्वातन्त्र्यरक्षणाय गणतन्त्रस्य आवश्यकता विद्यते । यदि राष्ट्रे प्रजातन्त्रात्मकं शासनं भवति तर्ह्येव राष्ट्रं चिरं यावत् सुस्थितं भवति । एतदर्थमेव अस्माकं राष्ट्रे प्रजातन्त्रात्मकशासनप्रणाली विद्यते, यस्याः कारणमस्ति अस्माकं संविधानम् । संविधानेऽस्मिन् जनानाम् अधिकारैः सह तेषां कर्तव्याणामपि उल्लेखः विद्यते । अतः सर्वैः स्वस्वकर्तव्यस्य पालनं करणीयम् । कार्यक्रमेऽस्मिन् छात्रैः विविधाः सांस्कृतिककार्यक्रमाः अपि प्रस्तुताः यत्र गीतं, नाटकं, प्रहसनं, समूहनृत्यमित्यादिकार्यक्रमाः प्रशंसार्हाः आसन् । एतस्य समग्रस्य कार्यक्रमस्य सुन्दरतया सञ्चालनं दर्शनसङ्कायाध्यक्षेण डो. जानकीशरण-आचार्येण डो. जयेशमुंगरामहोदयेन च कृतम् ।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 15, page no. 04)